# श्रीमद् भागवत रसिक कुटुंब

## कल्याण वृष्टि स्तोत्र

कल्याणवृष्टिभिरिवामृतपूरिताभिर् –
लक्ष्मीस्वयं(वँ्)वरणमङ्गलदीपिकाभिः ।
सेवाभिरम्ब तव पादसरोजमूले,
नाकारि किं मनसि भक्तिमतां(ञ्) जनानाम् ॥1॥

एतावदेव जननि स्पृहणीयमास्ते,
त्वद्वन्दनेषु सलिलस्थगिते च नेत्रे ।
सांनिध्यमुद्यदरुणायतसोदरस्य,
त्वद्विग्रहस्य सुधया परयाप्लुतस्य ॥2॥

ईशित्वभावकलुषाः(ख्) कति नाम सन्ति,
ब्रह्मादयः(फ्) प्रतियुगं प्रलयाभिभूताः ।
एकः(स्) स एव जननि स्थिरसिद्धिरास्ते,
यः(फ्) पादयोस्तव सकृत् प्रणतिं(ङ्) करोति ॥3॥

लब्ध्वा सकृत् त्रिपुरसुन्दरि तावकीनं(ङ्),
कारुण्यकन्दलितकान्तिभरं(ङ्) कटाक्षम् ।

कन्दर्पभावसुभगास्त्वयि भक्तिभाजः(स्),
सम्मोहयन्ति तरुणीर्भुवनत्रयेषु ॥4॥

ह्रींकारमेव तव नाम गृणन्ति वेदा,
मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ।
यत्संस्मृतौ यमभटादिभयं(वँ) विहाय,
दीव्यन्ति नन्दनवने सह लोकपालैः ॥5॥

हन्तुः(फ्) पुरामधिगलं परिपूर्यमाणः(ख्),
क्रूरः(ख्) कथं(न्) नु भविता गरलस्य वेगः ।
आश्वासनाय किल मातरिदं(न्) तवार्धं(न्),
देहस्य शश्वदमृताप्लुतशीतलस्य ॥6॥

सर्वज्ञतां सदसि वाक्पटुतां प्रसूते,
देवि त्वदङ्घ्रिसरसीरुहयोः(फ्) प्रणामः ।
किं(ञ्) च स्फुरन्मुकुटमुज्ज्वलमातपत्रं(न्),
द्वे चामरे च वसुधां महतीं(न्) ददाति ॥7॥

कल्पद्रुमैरभिमतप्रतिपादनेषु,
कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः ।
आलोकय त्रिपुरसुन्दरि मामनाथं(न्),
त्वय्येव भक्तिभरितं(न्) त्वयि दत्तदृष्टिम् ॥8॥

हन्तेतरेष्वपि मनांसि निधाय चान्ये,
भक्तिं(व्) वहन्ति किल पामरदैवतेषु ।
त्वामेव देवि मनसा वचसा स्मरामि,
त्वामेव नौमि शरणं(ञ्) जगति त्वमेव ॥9॥

लक्ष्येषु सत्स्वपि तवाक्षिविलोकनाना –
मालोकय त्रिपुरसुन्दरि मां(ङ्) कथं(ञ्)चित् ।
नूनं मयापि सदृशं(ङ्) करुणैकपात्रं(ञ्),
जातो जनिष्यति जनो न च जायते च ॥10॥

ह्रीं ह्रीमिति प्रतिदिनं(ञ्) जपतां(ञ्) जनानां(ङ्),
किं(न्) नाम दुर्लभमिह त्रिपुराधिवासे ।
मालाकिरीटमदवारणमाननीयां–
स्तान् सेवते मधुमती स्वयमेव लक्ष्मीः ॥11॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि,
साम्राज्यदानकुशलानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरितौघहरोद्यतानि,
मामेव मातरनिशं(ङ्) कलयन्तु नान्यम् ॥12॥

कल्पोपसंहरणकल्पितताण्डवस्य,
देवस्य खण्डपरशोः(फ्) परमेश्वरस्य ।
पाशाङ्कुशैक्षवशरासनपुष्पबाणा,

सा साक्षिणी विजयते तव मूर्तिरेका ॥13॥

लग्नं सदा भवतु मातरिदं(न्) तवार्धं(न्),
तेजः(फ्) परं बहुलकुङ्कुमपङ्कशोणम् ।
भास्वत्किरीटममृतांशुकलावतंसं,
मध्ये त्रिकोणमुदितं परमामृतार्द्रम् ॥14॥

ह्रींकारमेव तव धाम तदेव रूपं(न्),
त्वन्नाम सुन्दरि सरोजनिवासमूले ।
त्वत्तेजसा परिणतं(वँ) वियदादिभूतं,
सौख्यं(न्) तनोति सरसीरुहसम्भवादेः ॥15॥

ह्रींकारत्रयसम्पुटेन महता मन्त्रेण संदीपितं,
स्तोत्रं(यँ) यः(फ्) प्रतिवासरं(न्) तव पुरो मातर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्थायिनी,
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं(वँ) वयः ॥16॥

॥इति श्रीमच्छंकराचार्यविरचितं(ङ्) कल्याणवृष्टिस्तोत्रं सम्पूर्णम्॥